## ४७. देहलीदर्शनम्

लङ्

रामचन्द्रः - कदा आगच्छत् देहलीतः ?

चेतनः - ह्यः एव आगच्छम्।

रामचन्द्रः - प्रयाणं सुखकरम् आसीत् किम् ?

चेतनः - प्रयाणं तु सुखकरम् आसीत्। १० दिनाङ्के प्रातः एव प्राप्नुवम्। स्नेहितः निस्थानम् आगच्छत्। तेन सह अगच्छम्।

रामचन्द्रः - देहलीनगरे किं किम् अपश्यत् ?

चेतनः - कुतुबमीनारम् अपश्यम्। सुन्दरम् अस्ति। मार्गदर्शकः विवरणम् अकरोत्।

रामचन्द्रः - राष्ट्रपतिभवनं न अपश्यः किम् ?

चेतनः - तत्तु अपश्यम्। बहु विशालम् अस्ति।

रामचन्द्रः - भोजनार्थं किम् अकरोः ?

चेतनः - आवां कमलमन्दिरं द्रष्टुं बहुदूरम् अगच्छाव तत्रैव समीपे दक्षिणभारतीय-उपाहार मन्दिरम् अस्ति तत्र भोजनार्थम् अगच्छाव। रोटिकाः, ओदनं, च अखादाव। बहु स्वादिष्टम् आसीत्।

रामचन्द्रः - देहलीतः किम् आनयः।

चेतनः - किमपि न आनयम्। रविवासरः इति सर्वे आपणाः पिहिताः आसन्।

रामचन्द्रः - तव स्नेहितोऽपि निस्थानम् आगच्छत् वा ?

चेतनः - नैव, तस्य सङ्गणककार्यम् अस्ति इति तथैव अगच्छत्। गमनसमये बहूनि फलानि अपि अयच्छत्।